र्हलयोजनमात्रेण स्वल्पतरदण्डाघातेन वा मूर्च्छया पतनं भवति अनन्तरं गमनं ग्रासादौ कृते मरणं भवति तदा गमनग्रासग्रहणतोयपानैस्तदानीन्तनमरणे हेत्वभावं निश्चित्य पूर्वव्याधिविनष्टत्वं ज्ञायते। यदि तु पूर्वव्याधिरहित एव प्रहारजनितव्याधिना ग्रासादि कृत्वापि म्रियते तदा प्रायश्चित्तमस्त्येव। संवर्त्तः “यन्त्रणे गोश्चिकित्सायां मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते। औषधं स्नेहमाहारान् दद्याद् गोब्राह्मणेषु च। प्राणिनां प्राणवृत्त्यर्थं प्रायश्चित्तं न विद्यते। दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते” मूढगर्भः अन्तर्मृतगर्भः तह वैचित्त्ये इत्यनेन तथार्थत्वात्। याज्ञवल्क्यः “क्रियमाणोपकारे तु मृते विप्रे न पातकम्। विपाके गोवृषाणाञ्च भेषजाग्निक्रियासु च”। विशेषमाहाङ्गिराः “शृङ्गभङ्गेऽस्थिभङ्गे च चर्मनिर्मोचनेऽपि वा। दशरात्रं चरेत् कृच्छ्रं सुस्था सा यदि गौर्भवेत्”। द्विजानां गवाञ्च हितार्थमित्यर्थः। अत्र प्राणरक्षार्थमाहारादिदानैर्मरणे दोषाभावस्य वाचनिकत्वात् गललग्नान्नमरणे नात्मघातादि। एवं “गोपालको गवां गोष्ठे धूमं यस्तु न कारयेत्। मक्षिकालीननरके मक्षिकाभिः स भक्ष्यते” इति देवीपुराणानुसारादग्निं प्रज्वाल्य तत्रैव स्थितस्य दैवात्तदग्निना मरणे दोषाभावः। तत्रास्थितस्य तु अपालननिमित्तगोवधजन्यदोषः। मिताक्षरायां पराशरः “कूपे खाते च धर्मार्थं गृहदाहे च ये मृताः। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते” इदन्तु बन्धनरहितस्य पशोः कदाचित् दाहादिना मृतविषयम्। इतरत्रापस्तम्बोक्तम् “कान्तारेष्वथ वा दुर्गे गृहदाहावटादिषु। यदि तत्र विपत्तिः स्यात् पाद एको विधीयते”। इति ज्ञेयम्। एतद्वचनं यमस्येति भवदेवभट्टः। चिकित्सायां पापाभावो यथावदुपचारे बोध्यः। न पुनः सन्निपाताभिभूतस्योदकपानादिना। अतएव मनुः “चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः”। काश्यपोऽप्यत्र प्रायश्चित्तमाह “दोग्ध्री दमनातिदोहात्रासपाशदामघण्टाभरणयोजनात् तैलपानौषधविनियोगाद्व्यापन्नानां प्रायश्चित्तं ब्राह्मणेभ्यो विनिवेद्य सशिखवपनं कृत्वा प्राजापत्यकृच्छ्रमाचरेत्। चीर्णान्ते गां दक्षिणां ब्राह्मणाय दद्यात् धेनुं तिलधेनुं वेति”।

प्रायश्चित्तपूर्वाह्णकृत्यम्। शङ्खलिखितौ “वाप्य केशनखान् पूर्वं इतं स्नाप्य अहिर्निशि। प्रत्येकं नियतं कारमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपासीनो वाग्यतस्त्रिषवनं स्पृशेत्”। केशधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः “राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्। केशानां धारणार्थं तु द्विगुणं व्रतमाचरेत्। द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत्। विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम्। ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः”। सधवास्त्रीणां विशेषमाह भवदेवभट्टधृतं वचनम्। “वपनं नैव नारीणां नानुव्रज्या जपादिकम्। न गोष्ठे शयनं तासां न च दध्याद्गवाजिनम्। सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्। सर्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम्”। पापभेदेषु प्रायश्चित्तभेदाः प्रायश्चित्तविवेकादौ दृश्याः विस्तरभयान्नोक्ताः। तस्येदं छ। प्रायश्चित्तीय तदाचरणे न०।

**प्रायश्चित्ति** स्त्री प्रायः (अव्ययम्)। तपस्विचित्तिः चित–भावे क्तिन् इत०। प्रायश्चित्तशब्दार्थे

**प्रायश्चित्तिन्** त्रि० प्रायश्चित्तं कर्त्तव्यत्वेनास्त्यस्य इनि। प्रायश्चित्तार्हे स्त्रियां ङीप्। “प्रायश्चित्ती भवेत् पूतस्तत् पापं तेषु गच्छति” प्रा०त०। ठन् प्रायश्चित्तिक तत्रार्थे

**प्रायस्** अव्य० प्र+अय–असि। १बाहुल्ये २तपसि व्रतादौ च “प्रायः पयोधरसमुन्नतिरत्र हेतुः” उद्भटः। “प्रायो नाम तपः प्रोक्तम्” स्मृतिः।

**प्रायाणिक** त्रि० प्रयाणाय हितं ठक्। यात्रिकद्रव्ये शब्दकल्पद्रुमादौ प्रायाणिकादयोऽप्यत्र।

**प्रायिक** त्रि० प्रायेण भवः ठक्। प्रायभवे। [शब्दच०।

**प्रायुद्धेषिन्** पु० प्रायुधि प्रकृष्टयुद्धार्थं हेषते हेष–णिनि। अश्वे

**प्रायोग** पु० प्रयुज्यते शकटादौ प्र+युज–कर्मणि घञ् कुत्वम् दीर्घः। शकटादौ नियोगार्हे वृषे सि० कौ० १०।१०६।२ भा०।

**प्रायोगिक** त्रि० प्रयोगं नित्यमर्हति छेदा० ठञ्। नित्यप्रयोगार्हे।

**प्रायोज्य** न० प्र+आ+युज–णिच्–कर्मणि यत्। प्रयोजनीये “प्रायोज्यं न विभज्येत” कात्या०स्मृ०। “प्रायोज्यम् प्रयोजनार्हं यथा पण्डितस्य पुस्तकादि न तन्मूर्खैर्विभजनीयमिति” दायभागः।

**प्रायोपविष्ट** त्रि० प्रायाय अनशनमृत्यवे उपविष्टः उप+